शङ्कपङ्कविधवाः कुब्जाः कुटुम्बे कलिर्वस्त्रादेः स्खलनं तुलापसमरं कृष्णानि धान्यानि च। कार्पासं वमनञ्च गर्दभरवो दक्षेऽतिरुट् गर्भिणी मुण्डार्द्राम्बरदुर्वचोऽन्धबधिरोदक्या न दृष्टाः शुभाः। कृष्णाम्बरा कृष्णविलेपनाढ्या कृष्णस्रजं मूर्द्धनि धारयन्ती। दृष्टा प्रकोपा यदि कृष्णवर्णा नारी नरैस्तद्विपदो भवन्तीति" शब्दार्थचि०धृतवाक्यम्

दिग्भेदादिभिः शकुनभेदे फलभेदः वृ०सं०८६अ० उक्तो यथा "अन्यजन्मान्तरकृतं कर्म पुंसां शुभाशुभम्। यत्तस्य शकुनः पाकं निवेदयति गच्छताम्। ग्रामारण्याम्बुभूव्योमद्युनिशोभयचारिणः। रुतयातेक्षितोक्तेषु ग्राह्याः स्त्रीपुन्नपुंसकाः। पृथग्जात्यनवस्थानादेषां व्यक्तिर्न लक्ष्यते। सामान्यलक्षणोद्देशे श्लोकावृषिकृताविमौ। पीनोन्नतविघृष्टांसाः पृथुग्रीवाः सुवक्षसः। स्वल्पगम्भीरविरुताः पुमांसः स्थिरविक्रमाः। तनूरस्कशिरोग्रीवाः सूक्ष्मास्यपदविक्रमाः। प्रसक्तमृदुभाषिण्यः स्त्रियोऽतोऽन्यन्नपुंसकम्। ग्रामारण्यप्रचाराद्यं लोकादेवोपलक्षयेत्। सङ्क्षिप्तसुरहं वक्ष्मि यात्रामात्रप्रयोजनम्। पथ्यात्मानं नृपं सैन्ये पुरे चोद्दिश्य दैवताम्। सार्थे प्रधानं साम्ये स्याज्जातिविद्यावयोऽधिकम्। भुक्तप्राप्तैष्यदर्कासु फलं दिक्षु तथाविधम्। अङ्गारिदीप्तधूमिन्यस्ताश्च शान्तास्ततोऽपराः। तत्पञ्चमदिशां तुल्यं शुभं त्रैकाल्यमादिशेत्। परिशेषयोर्दिशोर्वाच्यं यथासन्नं शुभाशुभम्। शीघ्रमासन्ननिम्नस्थैश्चिरादुन्नतदूरगैः। स्थानवृद्ध्युपघाताच्च तद्वद्ब्रूयात्फलं पुनः। क्षणतिथ्युडुवातार्कैर्देवदीप्तो यथोत्तरम्। क्रियादीप्तो गतिस्थानभावस्वरविचेष्टितैः। दशधैवं प्रशान्तोऽपि सौम्यस्तृणफलाशनः। मांसामेध्याशनो रौद्रो विमिश्रोऽन्नाशनः स्मृतः। हर्म्यप्रासादमङ्गल्यमनोज्ञस्थानसंस्थिताः। श्रेष्ठा मधुरसक्षीरफलपुष्पद्रुमेषु च। स्वकाले गिरितोयस्था बलिनो द्युनिशाचराः। क्लीवस्त्रीपुरुषाश्चैषां बलिनः स्युर्यथोत्तरम्। जवजातिबलस्थानहर्षसत्त्वस्वरान्विताः। स्वभूमावनुलोमाश्च तदूनाः स्युर्विवर्जिताः। कुक्कुटेभपिरिल्याश्च शिखिवञ्जुलछिक्कराः। बलिनः सिंहनादश्च कूटपूरी च पूर्वतः। क्रोष्टुकोलूकहारीतकाककोकर्क्षपिङ्गलाः। कपोतरुदिताक्रन्दक्रूरशब्दाश्च याम्यतः। गोशशक्रौञ्चलोमाशहंसोत्क्रोशकपिञ्जलाः। विडालोत्सववादित्रगीतहासाश्च वारुणाः। शतपत्रकुरङ्गाखुमृगैकशफकोकिलाः। चाषशल्यकपुण्याहघण्टाशङ्खरवा उदक्। न ग्राम्योऽरण्यगो ग्राह्यो नारण्यो ग्रामसंस्थितः। दिवाचरो न शर्वर्यां न च नक्तञ्चरो दिवा। द्वन्द्वरोगान्वितत्रस्ताः कलहामिषकाङ्क्षिणः। आपगान्तरिता मत्ता न ग्राह्याः शकुनाः क्वचित्। रोहिताश्वाजवालेयकुरङ्गोष्ट्रमृगाः शशः। निष्फलाः शिशिरे ज्ञेया वसन्ते काककोकिलौ। न तु भाद्रपदे ग्राह्याः सूकरश्ववृकादयः। शरद्यब्जादगोक्रौञ्चाः श्रावणे हस्तिचातकौ। व्याघ्रर्क्षवानरद्वीपिमहिषाः सबिलेशयाः। हेमन्ते निष्फला ज्ञेया बालाः सर्वे विमानुषाः। ऐन्द्रानलदिशोर्मध्ये त्रिभागेषु व्यवस्थिताः। कोशाध्यक्षानलाजीवितपोयुक्ताः प्रदक्षिणम्। शिल्पी भिक्षुर्विवस्त्रा स्त्री याम्यानलदिगन्तरे। परतश्चापि मातङ्गगोपधर्मसमाश्रयाः। नैरृतीवारुणीमध्ये प्रमदासूतितस्कराः। शौण्डिकः शाकुनी हिंस्रो वायव्यपश्चिमान्तरे। विषघातकगोस्वामिकुहकज्ञास्ततः परम्। धनवानीक्षणिकश्च मालाकारः परं ततः। वैष्णवश्चरकश्चैव वाजिनां रक्षणे रतः। एवं द्वात्रिंशतो भेदाः पूर्वदिग्भिः सहोदिताः। राजा कुमारो नेता च दूतः श्रेष्ठी चरो द्विजः। गजाध्यक्षश्च पूर्वाद्याः क्षत्रियाद्याश्चतुर्दिशम्। गच्छतस्तिष्ठतो वापि दिशि यस्यां व्यवस्थितः। विरौति शकुनो वाच्यस्तद्दिग्जेन समागमः। भिन्नभैरवदीनार्तपरुषक्षामजर्जराः। स्वरा नेष्टाः शुभाः शान्ता हृष्टप्रकृतिपूरिताः। शिवा श्यामा रला छुच्छुः पिङ्गला गृहगोधिका। सूकरी परपुष्टा च पुन्नामानश्च वामतः। स्त्रीसंज्ञा भासभषककपिश्रीकर्णछिक्कराः। शिखिश्रीकण्ठपिप्पीकरुरुश्येनाश्च दक्षिणाः। क्ष्वेडास्फोटितपुण्याहगीतशङ्खाम्बुनिःस्वनाः। सतूर्याध्ययनाः पुंवत् स्त्रीवदन्या गिरः शुभाः। ग्रामौ मध्यमषड्जौ तु गान्धारश्चेति शोभनाः। षड्जमध्यमगान्धारा ऋषभश्च स्वरा हिताः। रुतकीर्त्तनदृष्टेषु भारद्वाजाजबर्हिणः। धन्या नकुलचाषौ च सरटः पापदोऽग्रतः। जाहकाहिशशक्रोडगोधानां कीर्त्तनं शुभम्। रुतसन्दर्शनं नेष्टं प्रतीपं वानरर्क्षयोः। ओजाः प्रदक्षिणं शस्ता मृगाः सनकुलाण्डजाः। चाषः सनकुलो वामो भृगुराहापराह्णतः। छिक्करः कूटपूरी च पिरिली चाह्नि दक्षिणा। अपसव्याः सदा शस्ता दंष्ट्रिणः सबिलेशयाः। श्रेष्ठे हयसिते प्राच्यां शवमांसे च दक्षिणे। कन्यकादधिनी पश्चादुदग्गोविप्रसाधवः। जालश्वचरणौ नेष्टौ प्राग्याम्यौ शस्त्रघातकौ। पश्चाद्वा सवषण्ढौ च